www.asttrolok.com

asttrolok

# वैदिक ज्ञान

## श्री सूक्तम्

**BETTER YOURSELF EVERY DAY!**

ओम् ॥ हिर॑ण्यवर्णां॒ हरि॑णीं सु॒वर्ण॑रज॒तस्र॑जाम् ।
च॒न्द्रां हि॒रण्म॑यीं-ल॒ँक्ष्मीं जात॑वेदो म॒ आव॑ह ॥
तां म॒ आव॑ह॒ जात॑वेदो ल॒क्ष्मीमन॑पगा॒मिनी᳚म् ।
यस्यां॒ हिर॑ण्यं-वि॒ँन्देयं॒ गामश्वं॒ पुरु॑षान॒हम् ॥
अ॒श्व॒पू॒र्वां र॑थम॒ध्यां ह॒स्तिना॑द-प्र॒बोधि॑नीम् ।
श्रियं॑ दे॒वीमुप॑ह्वये॒ श्रीर्मा॑ दे॒वीर्जु॑षताम् ॥
कां॒सो᳚स्मि॒ तां हिर॑ण्यप्रा॒कारा॑मा॒र्द्रां ज्वल॑न्तीं तृ॒प्तां त॒र्पय॑न्तीम् ।
प॒द्मे॒ स्थि॒तां प॒द्मव॑र्णां॒ तामि॒होप॑ह्वये॒ श्रियम् ॥
च॒न्द्रां प्र॑भा॒सां-य॒ँशसा॒ ज्वल॑न्तीं॒ श्रियं॑-लो॒ँके दे॒वजु॑ष्टामुदा॒राम् ।
तां प॒द्मिनी॑मीं॒ शर॑णम॒हं प्रप॑द्येऽल॒क्ष्मीर्मे॑ नश्यतां॒ त्वां-वृ॒ँणे ॥
आ॒दि॒त्यव॑र्णे॒ तप॒सोऽधि॑जा॒तो वन॒स्पति॒स्तव॑ वृ॒क्षोऽथ बि॒ल्वः ।
तस्य॒ फला॑नि॒ तप॒सानु॑दन्तु मा॒यान्त॑रा॒याश्च॑ बा॒ह्या अ॑ल॒क्ष्मीः ॥
उपै॑तु॒ मां दे॑वस॒खः की॒र्तिश्च॒ मणि॑ना स॒ह ।
प्रा॒दु॒र्भू॒तोऽस्मि॑ राष्ट्रे॒ऽस्मिन् की॒र्तिमृ॑द्धिं द॒दातु॑ मे ॥
क्षु॒त्पि॒पा॒साम॑लां ज्ये॒ष्ठाम॒लक्षीं ना॑शया॒म्यहम् ।
अभू॑ति॒मस॑मृद्धिं॒ च स॒र्वां॒ निर्णु॑द मे॒ गृहात् ॥
ग॒न्ध॒द्वा॒रां दु॑राध॒र्षां॒ नि॒त्यपु॑ष्टां करी॒षिणी᳚म् ।
ई॒श्वरी॑ग्ं सर्व॑भूता॒नां॒ तामि॒होप॑ह्वये॒ श्रियम् ॥
श्री᳚र्मे भ॒जतु । अल॒क्षी᳚र्मे न॒श्यतु ।

asttrolok

मन॑सः॒ काम॒माकू॑तिं-वाँ॒चः स॒त्यम॑शीमहि ।
प॒शू॒नाग्ं रू॒पमन्य॑स्य॒ मयि॒ श्रीः श्र॑यतां॒-यँशः॑ ॥
क॒र्दमे॑न प्र॑जाभू॒ता म॒यि॒ सम्भ॑व क॒र्दम ।
श्रिय॑-वाँ॒सय॑ मे कु॒ले॒ मा॒तर॑ं पद्म॒मालि॑नीम् ॥
आपः॑ सृ॒जन्तु॑ स्नि॒ग्धा॒नि॒ चि॒क्ली॒त व॑स मे॒ गृहे ।
नि च॑ दे॒वीं मा॒तर॒ं श्रिय॑-वाँ॒सय॑ मे कु॒ले ॥
आ॒र्द्रां पु॒ष्करि॑णीं पु॒ष्टिं॒ पि॒ङ्ग॒लां प॑द्ममा॒लिनीम् ।
च॒न्द्रां हि॒रण्म॑यीं-लँ॒क्ष्मीं जात॑वेदो म॒ आव॑ह ॥
आ॒र्द्रां-यँ॒ः करि॑णीं-यँ॒ष्टिं॒ सु॒व॒र्णां हे॑ममा॒लिनीम् ।
सू॒र्यां हि॒रण्म॑यीं-लँ॒क्ष्मीं॒ जात॑वेदो म॒ आव॑ह ॥
तां म॒ आव॑ह॒ जात॑वेदो ल॒क्षीमन॑पगा॒मिनी᳚म् ।
यस्यां॒ हिर॑ण्यं॒ प्रभू॑तं॒ गावो॑ दा॒स्योऽश्वा᳚न्, वि॒न्देय॒ं पुरु॑षान॒हम् ॥
यश्शुचि॑ः प्रयतो भू॒त्वा॒ जु॒हुयां॑-दाज्य॒-मन्व॑हम् ।
श्रिय॑ः प॒ञ्चद॑शर्चं च श्री॒काम॑स्सत॒त॒ं ज॑पेत् ॥
आनन्दः॑ कर्द॑मश्चै॒व चिक्ली॒त इ॑ति वि॒श्रुताः ।
ऋष॑य॒स्ते त्र॑यः पुत्राः स्व॒य॒ं श्रीरे॑व दे॒वता ॥
पद्मानने प॑द्म ऊ॒रू॒ प॒द्माक्षी प॑द्मस॒म्भवे ।
त्वं मा᳚ं भ॒जस्व॑ पद्मा॒क्षी ये॒न सौख्य॑-लँभा॒म्यहम् ॥
अ॒श्वदा॑यी च गोदा॒यी॒ ध॒नदा॑यी म॒हाध॑ने ।

धनं मे जुषंतां देवीं सर्वकांमार्थ सिद्धंये ॥
पुत्रपौत्र धनं धान्यं हस्त्यश्वाजाविगो रथम् ।
प्रजानां भवसि माता आयुष्मन्तं करोतु माम् ॥
चन्द्राभां-लँक्ष्मीमीशानां सूर्याभाँ श्रियमीश्वरीम् ।
चन्द्र सूर्याग्नि सर्वाभां श्री महालक्ष्मी-मुपास्महे ॥
धन-मग्नि-र्धनं-वाँयु-र्धनं सूर्यो धनं-वँसुः ।
धनमिन्द्रो बृहस्पति-र्वरुंणं धनमंश्नुते ॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनीं ॥
न क्रोधो न च मात्सर्यं न लोभों नाशुभा मतिः ।
भवन्ति कृत पुण्यानां भक्तानां श्री सूँक्तं जपेत्सदा ॥
वर्षँन्तु ते विंभावरि दिवो अभ्रस्य विद्युंतः ।
रोहँन्तु सर्वबीजान्यव ब्रह्म द्विषोँ जंहि ॥
पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्म-दलायताक्षी ।
विश्वप्रिये विष्णु मनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥
या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी ।
गम्भीरा वर्तनाभिः स्तनभरनमिता शुभ्र वस्तोत्तरीया ॥
लक्ष्मी-र्दिव्यै-र्गजेन्द्रै-र्मणिगण खचितै-स्स्नापिता हेमकुम्भैः ।
नित्यं सा पद्महस्ता मम वसतु गृहे सर्व माङ्गल्ययुक्ता ॥

लक्ष्मीं क्षीर समुद्र राजतनयां श्रीरङ्ग धामेश्वरीम् ।
दासीभूत समस्त देव वनितां-लौँकैक दीपाङ्कुराम् ।
श्रीमन्मन्द कटाक्ष लब्ध विभव ब्रह्मेन्द्र गङ्गाधराम् ।
त्वां त्रैलोक्य कुटुम्बिनीं सरसिजां-वँन्दे मुकुन्दप्रियाम् ॥
सिद्धलक्ष्मी-र्मोक्षलक्ष्मी-र्जयलक्ष्मी-स्सरस्वती ।
श्रीलक्ष्मी-र्वरलक्ष्मीश्च प्रसन्ना मम सर्वदा ॥
वराङ्कुशौ पाशमभीति मुद्राम् ।
करैर्वहन्तीं कमलासनस्थाम् ।
बालर्ककोटि प्रतिभां त्रिनेत्राम् ।
भजेऽहमम्बां जगदीश्वरीं ताम् ॥
सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यम्बके देवी नारायणि नमोस्तुते ॥
ॐ म॒हा॒दे॒व्यै च॑ वि॒द्महे॑ विष्णुप॒त्नी च॑ धीमहि । तन्नो॑ लक्ष्मीः
प्रचो॒दया॑॑त् ॥
श्री-र्वर्च॑स्व॒-मायु॑ष्य॒-मारो॑॑ग्य॒-मावी॑धा॒त् पव॑मानं मही॒यते॑ ।
धा॒न्यं ध॒नं प॒शुं ब॒हुपु॑त्रला॒भं श॒तसँ॑॑वँत्स॒रं दी॒र्घमायु॑ः ॥
ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

asttrolok

# Pathshala

## COMPLETE VEDIC ASTROLOGY




**All Modules**

**From Basic to Mastery**

**हिंदी में**

**Register now!**

**Limited time offer !**

email: **admission_1@asttrolok.com**
Contact: **+91 9174822333**
www.asttrolok.com